No. of Printed Pages/Questions: 10/ 18

# O. P. JINDAL SCHOOL, SAVITRI NAGAR

## Half Yearly Examination (2023 – 2024)

**Class: VIII** **MM: 80**

**Subject: Sanskrit** **Time: 3. Hrs.**

Name: _______________ Roll No.:___________

***Fifteen Minutes Extra will be for reading the Question Paper.***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड 'क' | अपठित अवबोधनम् | (10 अङ्काः) |
| खण्ड 'ख' | रचनात्मकंकार्यम् | (15 अङ्काः) |
| खण्ड 'ग' | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड 'घ' | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वेप्रश्नाः अनिवार्याः।

3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

4) प्रश्नसंख्या अवश्यं लेखनीया।

5) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड 'क' अपठित–अवबोधनम्

**प्र01 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

विद्या सर्वश्रेष्ठं सर्वप्रधानं धनं भवति। संसारस्य अन्यानि सर्वाणि धनानि व्यये कृते नश्यति परम विद्याधनं यत् व्यये कृते वर्धते। विद्यां विना नरः पशुतुल्यः भवति। विद्यया जीवनम् आलोकितं भवति। अज्ञानान्धकारं च दूरी भवति। विद्यया एव नरः प्रतिष्ठितः भवति। विद्वान् एव सर्वत्र पूज्यते। विद्याधनं केनापि चोरयितुं न शक्यते। विद्याफलं भ्रातृभाज्यं न भवति। विद्याधनं भारकारि अपि न भवति।

**I एकपदेन उत्तरत–** **(½x4=2)**

- i सर्वश्रेष्ठं धनं किम् भवति ?
- ii विचित्रं धनं किम् ?
- iii व्यये कृते किं वर्धते ?
- iv कः सर्वत्र पूज्यते ?

**II एकवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(2x2=4)**

- i विद्याधनं विचित्रं किमर्थम् अस्ति ?
- ii विद्यया जीवनं कीदृशं भवति ?
- iii जीवनं कथं आलोकितं भवति ?

III अनुच्छेदस्य कृते एकम् शीर्षकं लिखत– (1X1=1)
*( अनुच्छेद के लिए उचित शीर्षक लिखिए )*

IV निर्देशानुशारम् उत्तरत– (केवलं प्रश्नत्रयम्) (1X3=3)

**i** 'पशुतुल्यः' इति विशेषण पदस्य विशेष्यपदम् किम् ?
(अ) पशु (ब) विद्या (स) नरः (द) किमपि न

**ii** अनुच्छेदे 'प्राविशत्' क्रियापदस्य कर्त्तृपदम् किं ?
(अ) भ्राता (ब) वानराः (स) सेना (द) रामः

**iii** 'संसारस्य' इति पदे का विभक्ति अस्ति ?
(अ) चतुर्थी (ब) सप्तमी (स) पंचमी (द) षष्ठी

**iv** "विद्यया एव नरः प्रतिष्ठितः भवति" अस्मिन् वाक्ये अव्ययः पदं किम् ?
(अ) एव (ब) नरः (स) विद्यया (द) प्रतिष्ठितः

## खण्ड–'ख' रचनात्मकं–कार्यम्

**प्र02 तव नाम शिवम् अस्ति। स्वविद्यालयस्य वर्णनं कुर्वन् स्वमित्रं प्रति पत्रं लिखत–**
( आपका नाम शिवम् है। अपने विद्यालय का वर्णन करते हुए मित्र को पत्र लिखिए। ) **(½X10=5)**

सावित्री नगरात्
रायगढतः
तिथि 22/09/2023
प्रिय मित्र (1)-----
(2) --------

अहम् अत्र कुशलोऽस्मि। छात्रावासे (3) ------ मम अनेकानि मित्राणि सन्ति। (4) ------ स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम (5) -------- अतीव विशालः सुन्दरः वातानुकूलितः च अस्ति। वसन्तकुंजे स्थिते अस्मिन् विद्यालये सर्वे छात्राः (6) ------- सन्ति। अस्माकं सर्वे (7) ----- मनोयोगेन पाठयन्ति। तेषां योग्यता तु वस्तुतः प्रशंसनीया एव। वयम् (8) ------ अश्वारोहणस्य, क्रिकेटस्य, पादकन्दुकस्य, टेबलटेनिस–बास्केटबाल च इति क्रीडासु प्रशिक्षणमपि (9)------- विस्तरेण पुनः लेखिष्यामि।

भवतः सुहृत्
(10) ----------

| सुमित, अधुना, परिश्रमिणः, शिवम्, प्राप्नुमः, अध्यापकाः, विद्यालयः, नमस्कारः, अहम्, विद्यालये |
|---|

प्र03 अधोदत्तचित्रं दृष्ट्वा मंजूषायां सहायतया पंचवाक्येषु चित्रवर्णनम् कुरुत। (1X5=5)



| |
|---|
| आगच्छति, वनस्य, सरोवरः, तडागे, मीनाः, कमलानि, तटे, मृग, कच्छपः, बहिः, तरतः |

**प्र0 4 अधोलिखितं संवादं मंजूषायां प्रदत्त शब्दैः पूरयत–** **(1X5=5)**

(निम्नलिखित वार्तालाप को मंजूषा से उचित शब्द चुनकर पुनः लिखिए )

**शीला** – हे संगीते! त्वम् किम् करोषि ?

**संगीता** – आगच्छ, अहम् तु (1) ——— पश्यामि।

**शीला** – जानासि अहम् तुभ्यम् (2) ——— आनयम्।

**संगीता** –शोभनम् (3) ——— पठित्वा अहम् एतां भ्रातृजायायै सुमित्रायै यच्छामि।

**शीला** – तव भ्रातः (4) ——— कुत्र वसति ?

**संगीता** – सः तु लाजपत नगरे (5) ———।

| |
|---|
| गीताम्, दूरदर्शनम्, संजयः, श्रीमद्भगवतगीताम्, वसति, |

## खण्ड– 'ग' अनुप्रयुक्त–व्याकरणम्

**प्र05 प्रदत्तविकल्पेभ्यः उचितंपदं चित्वा सन्धिः–विच्छेदं वा कुरुत**–(केवलं प्रश्नपंचम्)**(1X5=5)**

i पश्चिम दिशायां **सूर्यास्तः** भवति।

(अ) सूर्य + अस्तः (ब) सूर्या + आस्त (स) सुरिया + अस्त

ii परिश्रमेण **भाग्य + उदयः** भवति।

(अ) भाग्यउदयः (ब) भाग्योदयः (स) भाग्यादयः

iii तत् **भवनम्** कस्य अस्ति ?

(अ) भा + वनम् (ब) भव + नम् (स) भो + अनम्

iv सा **गै + इका** रमेशनगरे वसति।

(अ) गायिका (ब) गायीका (स) गायैका

v नगरे जनाः **महोत्सवे** नृत्यन्ति।

(अ) महो + उत्सवे (ब) महा + उत्सवे (स) महोत + सवे

vi सूर्यः **रवि + अपि** कथ्यते।

(अ) रविवापि (ब) रव्यपि (स) रवेपि

**प्र0 6 अधोदत्तः विकल्पेभ्यः उचितं शब्दरुपं चित्वा लिखत**– (केवलं प्रश्नचतुष्टयम्)**(1X4=4)**

i 'गज' शब्द – षष्ठी विभक्ति बहुवचने।

(अ) गजस्य (ब) गजानाम् (स) गजेषु

ii 'पितृ' शब्द – चतुर्थी विभक्ति बहुवचने ।

(अ) पित्राय (ब) पित्रायै (स) पितृभ्यः

iii 'लता' शब्द – सम्बोधन एकवचने ।

(अ) हे लते ! (ब) हे लता ! (स) हे लतयोः!

iv 'नदी' शब्द – सप्तमी विभक्ति द्विवचने।

(अ) नद्या (ब) नद्योः (स) नदीषु

v 'फलम्' शब्द – द्वितीया विभक्ति बहुवचने–

(अ) फलम् (ब) फले (स) फलानि

**प्र0 7 प्रदत्तः विकल्पेभ्यः उचितं धातुरुपं चित्वा लिखत**–(केवलं प्रश्नचतुष्टयम्) **(1X4=4)**

i 'भू' धातु – लोट्लकार प्रथमपुरुष द्विवचने –

(अ) भवताम् (ब) भव (स) भवतु

ii 'गम्' धातु – लट्लकार प्रथमपुरुष बहुवचने –

(अ) गच्छति (ब) गच्छन्ति (स) गमन्ति

iii 'पा' धातु – लृट्लकार उत्तमपुरुष एकवचने –

(अ) पास्यति (ब) पास्यामि (स) पिबिष्यन्ति

iv 'खाद्' धातु – लट्लकार मध्यमपुरुष एकवचने –

(अ) खादसि (ब) खादथः (स) खादन्ति

v 'लिख्' धातु – लोट्लकार उत्तमपुरुष एकवचने–

(अ) खादसि (ब) लिखति (स) लिखानि

**प्र0 8 अंकेन लिखितं समयं संस्कृतपदेन लिखत**– (केवलं प्रश्नचतुष्टयम्) **(1X4=4)**

i एका चटका प्रातः (4:00) ——— वादने जागर्ति।

ii विजयः प्रातः (6:15) ——— वादने व्यायामं करोति

iii सः मध्याह्ने (1:30) ——— भोजनं करोति।

iv तदा सः (3:45) ——— विश्रामं करोति।

v अपराह्ने (5:15) ——— क्रीडनाय गच्छति।

**प्र0 9 रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत**– (केवलं प्रश्नचतुष्टयम्) **(1X4=4)**

i मानवाः <u>वृक्षाणां</u> छायायां विरमन्ति।

(अ) कस्याः (ब) कस्य (स) काम् (द) केषाम

ii सः <u>राष्ट्रवादी</u> कविः मन्यते।

(अ) कीदृशः (ब) कानि (स) काम् (द) कस्य

iii वयम् <u>उपचारार्थम्</u> चिकित्सालयं गच्छामः।

(अ) किम् (ब) किमर्थम् (स) केन (द) कस्मात्

iv एषा गुहा <u>स्वामिनः</u> सदा आह्वानं करोति।

(अ) कीदृशः (ब) कस्य (स) कः (द) कस्याः

v <u>मधुमक्षिका</u> माधुर्यमेव जनयति।

(अ) का (ब) किम् (स) कया (द) के

**प्र0 10 मंजूषाप्रदत्तैः अव्ययैः रिक्तस्थानानि पूरयत–** (केवलं प्रश्नचतुष्टयम्) **(1X4=4)**

i भो छात्राः! कोलाहलम् ——— कुरु।

ii ——— सत्यम् वद।

iii सदा आचार्यं प्रणम्य ——— कक्षायाम् पठ।

iv ——— एकः नृपः आसीत्।

v विद्यावान् ——— पूज्यते।

| एव, सर्वत्र, मा, पुरा, सर्वदा, |
|---|

## खण्ड– 'घ' पठित–अवबोधनम्

**प्र0 11 अधोलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत –**

समीपे एका लोमशिका बदरी–गुल्मानां पृष्ठे निलीना एतां वार्तां शृणोति स्म। सा सहसा चंचलम् उपसृत्य कथयति– "का वार्ता ? माम् अपि विज्ञापय। "सः अवदत्– "अहह मातृस्वसः। अवसरे त्वं समागतवती। मया अस्य व्याघ्रस्य प्राणाः रक्षिताः, परम् एषः मामेव खादितुम् इच्छति।" तदनन्तरं सः लोमशिकायै निखिलां कथां न्यवेदयत्। लोमशिका चंचलम् अकथयत्– "बाढ़म्, त्वं जालं प्रसारय।" पुनः सा व्याघ्रम् अवदत्– "केन प्रकारेण त्वं एतस्मिन् जाले बद्धः इति अहं प्रत्यक्षं द्रष्टुम् इच्छामि।"

**I एकपदेन उत्तरत** – (केवलं प्रश्नद्वयम्) **(½X2=1)**

i 'का वार्ता' इति का पृच्छति ?

ii सः कस्मै निखिलां कथां न्यवेदयत् ?

iii लोमशिका चंचलं किम् अकथयत् ?

II पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (1X2=2)

i लोमशिका किं प्रत्यक्षं द्रष्टुम् इच्छति ?

ii बदरी–गुल्मानां पृष्ठे का निलीना आसीत् ?

iii लोमशिका व्याघ्रम् किम् अवदत् ?

III निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) (1X2=2)

i अनुच्छेदे 'खादितुम्' इति पदे कः प्रत्यय ?

अ) अनीयर ब) तुमुन् स) शतृ

ii अहह मातृस्वसः! इति व्याधः कस्यै सम्बोधयति ?

अ) स्वीयां ब) लोमशिकाम् स) चंचलाय

iii "माम् अपि विज्ञापय" अत्र 'माम्' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

अ) व्याघ्राय ब) लोमशिकायै स) चंचलाय

**प्र0 12 अधोलिखितं पद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

साहित्य संगीत कला विहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम्।।

I **एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) (½X2=1)

i का विहीनः पशु भवति ?

ii पशु किं खादति ?

iii कः संगीत शिक्षयति ?

II **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) (1X2=2)

i कः साक्षात् पशु भवति ?

ii पशूनाम् परमं भागधेयं किम् ?

iii तृणं न खादन् अपि कः जीवति ?

III निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1x2=2)

i 'न खादन्' इति क्रियापदस्य कर्तृपदम् किम् ?

अ) पशु ब) मनुष्य स) तृणम्

ii 'भाग्यम्' इत्यर्थे अनुच्छेदे किम् पदम् प्रयुक्तम् ?

अ) खादन् ब) भागधेयं स) साक्षात्

iii 'पशूनाम्' इति पदे का विभक्ति ?

अ) चतुर्थी ब) सप्तमी स) षष्ठी

**प्र0 13 अधोलिखितं नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

**सिंहः** – "नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगुढो भूत्वा तिष्ठामि" इति।

**श्रृगालः** – अहो! विनष्टोऽस्मि नूनम् अस्मिन् बिले सिंहः अस्तीति तर्कयामि। तत् किं करवाणि ? एवं विचिन्त्य दूरस्थः एव रवं कर्तुमारब्धः।

**श्रृगालः** – भो बिलः! भो बिलः! किं न स्मरसि यन्मया त्वया सह समयः कृतोऽस्ति यत् यदाहं प्रत्यागमिष्यामि तदा त्वं माम् आकरयिष्यसि ? यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि इति।

**सिहः** – नूनमेषा गुहा स्वामिनः सदा समाह्वानं करोति। परन्तु मद्भयात् न किंचित् वदति।

I **एकपदेन उत्तरत**– (केवलं प्रश्नद्वयम्) **(½x2=1)**

i रात्रौ गुहायां कः आगच्छति ?

ii कः निगूढो भूत्वा तिष्ठति ?

iii कः कथयति किं करवाणि ?

II **पूर्णवाक्येन उत्तरत**– (केवलं प्रश्नद्वयम्) (1x2=2)

i श्रृगालः किं तर्कयति ?

ii गुहा किमर्थम् आह्वानं न करोति ?

iii श्रृगालेन सह गुहा कः समयः कृतः आसीत् ?

III निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) (1X2=2)

i "प्रत्यागमिष्यामि" इति कः कथयति ?

अ) सिंहः ब) गुहा स) श्रृगालः

ii 'निश्चितम्' इत्यर्थे संवादे किं शब्दं प्रयुक्तम् ?

अ) नूनम् ब) समयः स) सदा

iii 'गुहा' इति शब्दस्य पर्यायवाची संवादे किं प्रयुक्तम् ?

अ) यदाहं ब) बाह्यतः स) बिलम्

**प्र0 14 मंजूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत**–(केवलं प्रश्नचतुष्टयं) **(1X4=4)**

| जहीहि, देहि, चल, विधेहि, कुरु |
|---|

i त्वं विद्यालयं ——————।

ii मह्यं जलम् ———————।

iii राष्ट्रे अनुरक्तिं ————————।

iv सततं ध्येयं स्मरणं ————————।

v मूढ! —————— धनागम तृष्णाम्।

**प्र0 15 घटनाक्रमानुसारं वाक्यानि पुनः उचित क्रमेण लिखत–** **(½X6=3)**

( निम्नलिखित घटनाक्रम को उचितक्रम में पुनः लिखिए )

i गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्।

ii सिंहः एकां महतीं गुहाम् अपश्यत्।

iii परिभ्रमन् सः क्षुधार्थः जातः।

iv दूरस्थः शृगालः रवं कर्त्तुम् आरब्धः

v दूरं पलायमानः शृगालः श्लोकम् अपठत्।

vi गुहायां कोऽपि अस्ति इति शृगालस्य विचारः।

प्र0 16 निम्न शब्दानांकृते द्वौ–द्वौ पर्यायौ लिखत– (½x6=3)

i सिंहः – ———— , ————————

ii नित्यः – ————, ————————

iii धर्मः – ————, ————————

प्र0 17 उदाहरणानुसारं विशेषण–विशेष्येण सह मेलनम् कुरुत– (½x4=2)

| यथा– विशेषण | विशेष्य |
| --- | --- |
| *सम्पूर्णे* | *भारते* |
| (1) चंचलः | (क) मातृस्वसः |
| (2) नद्याः | (ख) छायाम् |
| (3) वृक्षाणाम् | (ग) व्याधः |
| (4) लोमशिका | (घ) जलम् |

प्र0 18 अधोलिखितवाक्येषु कोष्ठकात् उचितं संख्यारुपैः रिक्तस्थानानि पूरयत– (½x6=3)

(कोष्ठक से उचित संख्यापद चुनकर वाक्यपूर्ति कीजिए)

i वृक्षे ———— आम्राणि सन्ति। (त्रयः / त्रीणि / तिस्रः)

ii बिले ———— मूषकौ स्तः। (द्वे / द्वौ / द्वयम्)

iii वने ———— वृक्षाः आसन्। (चत्वारः / चत्वारि / चतस्रः)

iv तस्य ———— मित्रे स्तः। (द्वये / द्वे / द्वौ)

v गृहे ———— विश्रामासनम् अस्ति। (एकः / एका / एकम्)

vi सरोवरे ———— कच्छपाः तरन्ति। (त्रयम् / त्रयः / त्रीणि)

—00—